# Renuka Stotram by Shridhara Swami

# રેણુકાસ્તોત્રં શ્રીધરસ્વામિકૃતમ્

## Document Information

Text title : reNukAstotraM shrIdharasvAmikRitaM

File name : reNukAstotramshrIdharasvAmi.itx

Category : devii, reNukA, stotra, devI, shrIdharasvAmI

Location : doc_devii

Author : Shridhar Swami

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Translated by : http://ioustotra.blogspot.com/2010/10/shri-renuka-stotram.html

Latest update : June 30, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 24, 2021

*sanskritdocuments.org*

Renuka Stotram by Shridhara Swami

# રેણુકાસ્તોત્રં શ્રીધરસ્વામિકૃતમ્

શ્રીગણેશાય નમઃ ।

શિવાં શાન્તરૂપાં મનોવાગતીતાં
નિજાનન્દપૂર્ણાં સદાઽદ્વૈતરૂપામ્ ।
પરાં વેદગમ્યાં પરબ્રહ્મરૂપાં
ભજે રેણુકાં સર્વલૌકૈકવેદ્યામ્  ॥ ૧॥

સદાચારસદ્ભક્તિબોધાદિભિર્યા
ગુરોરઙ્ઘ્રિશુશ્રૂષયાં મુખ્યવૃત્ત્યા ।
સુવેદ્યા સુલભ્યા પરાનન્દપૂર્ણા
ભજે રેણુકાં તાં વિમોહપ્રશાન્ત્યૈ ॥ ૨॥

શ્રુતિર્નેતિનેતીતિ સર્વં નિરસ્ય
વદત્યેકમાદ્યં વિભું ચિત્સુખં યત્ ।
તદેવાવશિષ્ટં સ્વરૂપં વિશુદ્ધં
ભજે રેણુકાં તાં સદા મૃત્યુહીનામ્ ॥ ૩॥

યદાનન્દસિન્ધૌ નિમગ્નો ન પશ્યેદ્-
અહો કર્મજાલં ફલં વા તદીયમ્ ।
ન જૈવં ન શૈવં જગન્નૈવ માયાં
ચિદેકસ્વરૂપાં ભજે રેણુકાં તામ્ ॥ ૪॥

અનેકાન્તિકાં સર્વભેદાતિરૂપાં
તમોઽજ્ઞાનદુઃખાતિગાં શુદ્ધરૂપામ્ ।
સદાઽધ્યાત્મવિદ્યાપ્રદાનૈકશીલં
ભજે રેણુકાં મુક્તિસૌખ્યાધિદેવીમ્ ॥ ૫॥

ત્રિતાપપ્રશન્ત્યૈ સમારાધ્યમાનાં
સદા જીવલોકે સ્વસૌખ્યપ્રદાત્રીમ્ ।

ભવોમ્ભોધિસેતું ચિદાનન્દકન્દાં
ભજે રેણુકાં જ્ઞાનમુદ્રૈકલક્ષ્યામ્ ॥ ૬॥

સદા ભક્તહૃત્કૌમુદીં ભદ્રભદ્રાં
સદોઙ્કારવાચ્યાં વરેણ્યાં શરણ્યામ્ ।
સ્વભક્તાર્તિનાશાં શુભાઙ્ગાં ગુણાઢ્યાં
ભજે રેણુકાં ભક્તસૌખ્યાબ્ધિરૂપામ્ ॥ ૭॥

સદા ભક્તવાત્સલ્યપૂર્ણાં સુરમ્યાં
સુરેન્દ્રાદિભિઃ સ્તૂયમાનાં સુષૂક્તૈઃ ।
સદા ભક્તવૃન્દૈશ્ચ સંસેવ્યમાનાં
ભજે રેણુકાં ભક્તભાગ્યાં ભવાનીમ્ ॥ ૮॥

પઠેદ્યઃ સદા ભક્તિયુતો વિશુદ્ધઃ
સ્વવર્ણાશ્રમાચારતો નિત્યયુક્તઃ ।
સ મુક્તઃ કૃતી રેણુકાયાઃ પ્રસાદાત્
સદા રાજતે રાજતે લોકપૂજ્યા ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસદ્ગુરુભગવતા શ્રીધરસ્વામિના
વિરચિતં શ્રીરેણુકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Kaushal S. Kaloo kaushalskaloo at gmail.com

---

*Renuka Stotram by Shridhara Swami*
pdf was typeset on January 24, 2021

Please send corrections to *sanskrit@cheerful.com*